शुनः पादो न संशयः । दृष्ट्वा भाले द्विजातीनामच्छिद्रमूर्द्ध्वपुण्ड्रकम् । कार्ष्णिः कृष्णस्मृतिं कृत्वा वस्त्रेणाच्छादयेन्मुखम् । ललाटदक्षिणे ब्रह्मा वसेद्वामे महेश्वरः । मध्ये विष्णुर्वसेन्नित्यं तस्मान् मध्यं न लेपयेत् । वर्त्तुलं तिर्य्यगच्छिद्रं ह्रस्वं दीर्घं ततं नतम् । षष्ठलक्षणसंयुक्तं तिलकं यन्निरर्थकम् । खनित्रयष्टिकुन्तत्रिशूलमुकुराकृति । त्रिपुण्ड्रमर्द्धचन्द्रञ्च तिलकं यन्निरर्थकम् । प्रमाणान्नूर्द्ध्वपुण्ड्रस्य दीर्घं स्यात् कलिवर्द्धनम् । आनासामूलमारभ्य ब्रह्मरन्ध्रगतं यदि । शूद्रस्यैकाङ्गुलं प्रोक्तमायतं द्व्यङ्गुलं विशि । क्षत्रिये त्र्यङ्गुलं तद्वद्ब्राह्मणे चतुरङ्गुलम् । नासिकायास्त्रिभागैको भागोमानेन यो भवेत् । भ्रुवोर्मध्यादधः स्थानं मूलमाहुर्मणीषिणः । ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा । कुर्य्यात् यदूर्द्ध्वपुण्ड्रं तद्वैष्णवो हरिमन्दिरम् । वैष्णवा विप्रा भूपाश्चेत् वैश्यशूद्रान्त्यजाश्रमाः । यदूर्द्ध्वपुण्ड्रं विश्वयुक्तदेव हरिमन्दिरम् । नरोवाप्यथ वा नारी यदि कृष्णपथं लभेत् । यत्नतस्तुलसीमाला सन्धार्य्या हरिमन्दिरम् । मध्यच्छिद्रं न कुर्य्यात् यस्तिलकं यदि वैष्णवः । श्वपदं तच्चितातुल्यं भवेन्नारद! नान्यथा । दण्डाकारं द्विरेखं यत्तिलकं मूलकोणकम् । मध्यच्छिद्रन्तु तत्प्राहुरूर्द्ध्वपुण्ड्रं मनोहरम् । अधोमुखाब्जकलिकाकारं तिलकमुत्तमम् । मध्यच्छिद्रं युग्मरेखमूर्द्ध्वपुण्ड्रं प्रकीर्त्तितम् । तीर्थमृद् यज्ञकाष्ठञ्च विल्वोमलयसम्भवम् । अश्वत्थतुलसीमूलमृत्तिका गोष्पदस्य च । जाह्नवी मृन्महानिम्बतुलसीकाष्ठमेव च । कस्तूरीकुङ्कुमं फल्गुसिन्दूरं रक्तचन्दनम् । गोरोचना गन्धकाष्ठं जलं चागुरु गोमयम् । धात्रीमूलस्य मृद्गन्धो हरिद्रा गोगृहस्य च । स्नानान्ते सर्ववर्णानामाश्रमाणान्तथैव च । एतानि तिलकान्याहुः सन्ध्यादिसर्वकर्म्मसु" । "गङ्गामृत्तुलसीमूलमृत्तिकामलयोद्भवम् । साधोश्चरणसंलग्नं रजोमृद्गोष्पदस्य च । याऽश्वत्थमूलमृद्गोपीचन्दनं तीर्थमृत्तिका । कुङ्कुमं तुलसीकाष्ठं वैष्णवाहृतमृत्तिका । गोरोचना च कस्तूरी हरिद्रागुरुचन्दनम् । वल्मीकमृत्तिकागन्धः पद्मकं हरिचन्दनम् । गन्धकाष्ठं महानिम्बो यमुनातीरमृत्तिका । गुरुपादरजो वारिसुसाध्वङ्घ्रिरजो जले । कृत्वा प्रतिदिनं स्नानमेतैर्गन्धमृदादिभिः । चारु यत्तिलकं प्राहुस्तं तन्नाम्ना वैष्णवैर्ध्रुवम् । काम्यं नैमित्तिकं नित्यं यत् किञ्चित् कर्म्म नारद! । वर्णाश्रमाणां तन्नास्ति स्नानान्ते तिलकं विना । कर्म्म वर्णाश्रमाणां स्यात् दैवं पैत्रं न तत्फलम् । स्नानं सन्ध्यां पञ्च यज्ञान् पैत्रं होमादिकर्म्म यः । विना तिलकदर्भाभ्यां कुर्य्यात्तन्निष्फलं भवेत्" । इति पद्मोत्तरखण्डम् "वीक्ष्यादर्शे जले वापि यो विदध्यात् प्रयत्नतः । ऊर्द्ध्वपुण्ड्रं महाभागः स याति परमाङ्गतिम्" पाद्मे पातालखण्डे "शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक् त्रिपुण्ड्रकम् । विष्णवागमे दीक्षितस्तु ऊर्द्ध्वपुण्ड्रं विधारयेत्" । इति नागोजीभट्टधृतस्मृतसंहिता । पद्मपुराणे उत्तरखण्डे "ललाटे केशवं ध्यायेन्नारायणमथोदरे । वक्षःस्थले माधवन्तु गोविन्दं कण्ठकूपके । विष्णुञ्च दक्षिणे कुक्षौ वामे च मधुसूदनम् । त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके । श्रीधरं वामबाहौ तु हृषीकेशन्तु कन्धरे । पृष्ठे तु पद्मनाभञ्च कट्यां दामोदरं न्यसेत् । तत्प्रक्षालनतोयन्तु वासुदेवेति मूर्द्धनि" । किञ्च "ऊर्द्ध्वपुण्ड्रं ललाटे तु सर्वेषां प्रथमं स्मृतम् । ललाटादिक्रमेणैव धारणन्तु विधीयते" इति "एवं न्यासं समाचार्य्य सम्प्रदायानुसारतः । न्यसेत् किरीटमन्त्रञ्च मूर्द्ध्नि सर्वार्थसिद्धये" अथ किरीटमन्त्रः "ओम् श्रीकिरीटकेयूरहारमकरकुण्डलचक्रशङ्खगदापद्महस्तपीताम्बरधरश्रीवत्साङ्कितवक्षःस्थलश्रीभूमिसहितस्वात्मज्योतिर्दीप्तिकराय सहस्रादित्यतेजसे नमो नमः" हरिभक्तिविलासे ४विलासः । ऊर्द्ध्वपुण्ड्रशब्दे अधिकं दृश्यम् । ६ध्रुवकभेदे यथा "पञ्चविंशतिवर्णाढ्यस्तिलको ध्रुवको भवेत् । दृष्टश्चञ्चत्पुटे ताले रसे वीरे अद्भुतेऽपि वा" सङ्गीतदा० । "मुखे मधुश्रीस्तिलकं प्रकाश्य" कुमा० । तिलक इव उत्तरपदस्थः १०श्रेष्ठे "श्रियं त्रिलोकी तिलकः स एव" । "लोध्रचूर्णतिलकाकृतिः" माघः । स्वार्थे क । ११तिलवृक्षे राजनि० । "न तिलकस्तिलकः प्रमदामिव" रघुः ।

**तिलकट** न० तिलस्य रजः कटच् । तिलरजसि ।

**तिलकल्क** पु० तिलस्य कल्कः । १पिण्याके (खलि) अमरः "कषायेण स्रोतेनोदकमादाय तिलकल्कमधुसर्पिःप्रगाढामौषधयुतां वर्त्तिं प्रणिदध्यात्" "तिलकल्कः समधुको घृताक्तो व्रणरोपणः" सुश्रु० ।

**तिलका** स्त्री तिलं तिलपुष्पमिव कायति कै—क । हारभेदे जटा० "सगणद्वितयं भवतीह यदा रसवर्णपदा तिलकेति तदा" उक्तलक्षणके द्वादशाक्षरपादके २छन्दोभेदे च ।

**तिलकालक** पु० तिल इव कालकः कृष्णः । १देहस्थे २तिला०